# ॥ संसारोद्धरणस्तोत्रम् ॥

श्रितलोकामरभूरुहसदृशांघ्रे कृपया भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ १ ॥

रमणीरैसुतमोहितमनसं मोदद भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ २ ॥

घनसच्चित्सुखपूरित करुणासागर भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ३ ॥

वरदेशामितचित्रचरितभूभासुर भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ४ ॥

दरचक्रांकित कंठगतुलसीमालिक भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ५ ॥

यतिवर्यामितबोधसुमतविस्तारक भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ६ ॥

नमतामिष्टद कुष्टमुख महाकष्टह भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ७ ॥

ममता भक्तजने सुत इव जागर्ति हि भो भोः ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ८ ॥

स्तवनं कृष्णावधूतरचितं यः पठतीदम् ।
गुरुराजोद्धर मामयि पतितं संसृतिकूपे ॥ ९ ॥

॥ इति श्रीमत्कृष्णावधूतपंडितकृतौ संसारोद्धरणस्तोत्रम् ॥